एकतमः, त्रि, (एक+"एकाच्च प्राचाम्"। ५।३। ९४। इति डतमच्।) बहूनां मध्ये एकः। इति व्याकरणम्॥ (यथा महाभारते आदिपर्व्वणि। "अस्त्राणि वा शरीरं वा ब्रह्मन्नेकतमं वृणु"॥)

एकतरः, त्रि, (एक+"एकाच्च प्राचाम्"। ५।३। ९४। इति डतरच्।) द्वयोर्म्मध्ये एकः। इति व्याकरणम्। भिन्नः। इत्यमरटीकायां भरतः॥ (यदाह कात्यायनः।
"यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात्"॥)

एकता, स्त्री, (एकस्य भावः। एक+तल्+टाप्।) एकत्वम्। ऐक्यम्। इति व्याकरणम्॥
(यथा, रामायणे ६६।१२।
"बह्वीरपि मतीर्गत्वा मन्त्रिणो मन्त्रनिर्णये।
पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः"॥)

एकतानः, त्रि, (एकेन भावरसेन तन्यते विस्तीर्य्यते इति। तन इञ विस्तारे। कर्म्मण्यण्।) एकाग्रः। एकविषयासक्तचित्तः। इत्यमरः॥ (यथा भागवते ७।९।८।
"ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः
सत्त्वैकतानमतयो वचसां प्रवाहैः।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः
किं तोष्टुमर्हति स मे हरिरुग्रजातेः"॥
एकस्तानो विस्तृतिर्यस्येति।) एकताले पुं। इत्यमरटीकायां स्वामी॥

एकतालः, पुं, (एकस्तुल्यस्तालो मानं यत्र।) समन्वितलयः। नृत्यगीतवाद्यानां साम्यं यत्र। समताल इति यस्याख्या। इत्यमरभरतौ॥ (सङ्गीतशास्त्रे स्वनामख्यातः तालभेदः। त्रि, एकतालवृत्तसमन्वितः। यथा रघौ १५।२३।
"एकताल इवोत्पातपवनप्रेरितो गिरिः"॥)

एकतीर्थी, [न्] पुं, (एकं समं तीर्थमाश्रमो यस्य।) सतीर्थः। गुरुभाइ इति भाषा॥ ("एकतीर्थी एकाश्रमी" इति मिताक्षरा॥)

एकत्र, व्य, (एक+त्रल्।) एकस्मिन्। इति व्याकरणम्॥ एकसङ्गे इति भाषा। (एकत्र निर्णीतः शास्त्रार्थो बाधकं विनान्यत्रापि प्रयुज्यते"। इति दुर्गादासः। यथा मनुः। ५।१३६।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता"॥)

एकदंष्ट्रः, पुं, (एका दंष्ट्रा यस्य। परशुरामेणैकदन्तस्य उत्पाटनात् तथात्वम्।) गणेशः। इति त्रिकाण्डशेषः॥ (अस्य परशुरामकृतदन्तोत्पाटनकथा एकदन्तशब्दे द्रष्टव्या॥)

एकदन्तः, पुं, (एको दन्तो यस्य।) गणेशः। इत्यमरः॥ (परशुरामकृतगणेशदन्तोत्पाटनकथा ब्रह्मवैवर्त्ते उक्ता। एकदा रहसि स्थितयोः शिवाशिवयोर्द्वारपालत्वमङ्गीकृतं गजाननेन। एतस्मिन्नन्तरे परशुरामः शिवं द्रष्टुमागतः। शिवदर्शनव्याकुलस्यान्तर्जिगमिषोर्द्वाररोधे कृते गणपतिना सह तस्य तुमुलं युद्धमभवत्। परशुरामक्षिप्तेन परशुना च गजाननस्य एको दन्तः भग्नः। तदा प्रभृत्येव एकदन्तोऽसौ कथ्यते॥)

एकदा, व्य, (एक+"सर्व्वैकान्यकिंयत्तदः काले दा"। ५।३।१५। इति दाः) एकस्मिन् काले। तत्पर्य्यायः। युगपत् २। इत्यमरः॥
(यथा भागवते ६।२।२९।
"जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतोऽकृतविष्णुकृत्यान्"॥)

एकदृक्, [श्] पुं, (एकं सर्व्वमभिन्नं पश्यति यः। एकादृश्+क्विप्।) महादेवः। (एका दृक् यस्य। रामबाणमोक्षणेन नष्टे एकचक्षुषि काकस्य तथात्वम्।) काकः। काणे त्रि। इति हेमचन्द्रः॥ (एकमेव सर्व्वं ब्रह्मत्वेन पश्यति यः इति व्युत्पत्त्या तत्त्ववेत्ता। ब्रह्मज्ञानी॥ एकमेव पक्षं पश्यतीत्यर्थे एकपक्षाश्रयी॥)

एकदेहः, पुं, (एकः मुख्यो देहो यस्य। ग्रहेषु सौम्यत्वादस्य तथात्वम्।) बुधग्रहः। इति त्रिकाण्डशेषः॥ (एको मेदरक्तादीनां साम्यात् तुल्यो देहः शरीरं यत्र। गोत्रम्। वंशः।
यथा, हरिवंशे ४६ अध्याये।
"बहूनि विप्र गोत्राणि मुनीनां भावितात्मनाम्।
एकदेहानि तिष्ठन्ति विभक्तानि विना प्रजाः"॥
दम्पती। "अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुतेः"। तथा,—
"शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा"।
इति स्मृत्युक्तेश्च जायापत्योरेकदेहत्वम्"॥)

एकधा, व्य, (एक+"एकाद्धोध्यमुञ"। ४।२।४॥ इति धा।) एकप्रकारम्। इति व्याकरणम्॥
(यथा महाभारते अनुगीतापर्व्वणि १४।४२।६०।
"सर्व्ववित् सर्व्वभूतेषु विन्दत्यात्मानमात्मनि।
एकधा बहुधा चैव विकुर्व्वाणस्ततस्ततः"॥)

एकधुरः, त्रि, (एका धूः। "ऋक्पूरब्धूःपथामानक्षे"। ५।४।७४। इति अः समासान्तः।) एकभारवाहकगवादिः। एकपिठा गरु इति भाषा। तत्पर्य्यायः। एकधुरीणः २ एकधुरावहः ३। इत्यमरः॥ (यथा, पाणिनिः। ४।४।७९। "एकधुराल्लुक्"।)

एकधुरावहः, त्रि, (वहतीति वहः। वह्+अच्। एकधुरायाः वहः।) एकधुरः। इत्यमरः॥

एकधुरीणः, त्रि, (एकधुरां वहति यः। "एकधुराल्लुक् च"। ४।४।७९। चकारेण खस्यानुकर्षणसामर्थ्यात् पक्षे खवणम्॥) एकधुरः। एकभारवोढ़ा। इत्यमरः॥ एकस्य रथस्य लाङ्गलादेर्व्वा धुरं वहति यः। इत्यमरटीकायां भरतः॥

एकनटः, पुं, (एको मुख्यो नटः।) मुख्यनटः। तत्पर्य्यायः। कथकः २। इति त्रिकाण्डशेषः॥ कथाप्राणः ३। इति शब्दरत्नावली॥

एकपक्षः, त्रि, (एकः पक्षो यस्य।) सहायः। इति त्रिकाण्डशेषः॥ (एकः पक्षः इति विग्रहे। अद्वितीयः पक्षः॥ यथा, रघौ १४।३४।
"इत्येकपक्षाश्रयविक्लवत्वात्
आसीत् स दोलाचलचित्तवृत्तिः॥)

एकपत्नी, स्त्री, (एकोऽद्वितीयः पतिर्यस्याः इति विग्रहे "नित्यं सपत्न्यादिषु" इति एकपतिशब्दस्य नकारान्तादेशे "ऋन्नेभ्य" इति ङीप्।) पतिव्रता। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते।१०॥
"तां चावश्यं दिवसगणनातत्परामेकपत्नीम्"॥
एकः समानः पतिर्यस्या इति विग्रहे। सपत्नी। यथा मनुः। ९।१८५।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्मनुः"॥)

एकपत्रिका, स्त्री, (एकं गन्धवत्त्वात् श्रेष्ठं पत्रं यस्याः।) गन्धपत्रवृक्षः। इति राजनिर्घण्टः॥

एकपदं, क्ली, (एकं पदं पदमात्रोच्चारणकालो यस्मिन्।) तत्कालः। इति मेदिनी॥ (तत्पर्य्यायः। तत्क्षणम् २ इति विश्वः। यथा, रघुः ८। ४८। "कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे"॥ "एकपदे तत्क्षणे। स्यात् तत्क्षणे एकपदमिति विश्वः"। इति तट्टीका॥ एकं प्रशस्तं पदं स्थानम्। "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरोक्तेस्तथात्वम्। वैकुण्ठम्। सुप्तिङन्तरूपपदम्। यथा माघे २। ९५।
"निहन्त्यरीनेकपदे य उदात्तः स्वरानिव"॥
एकं श्रेष्ठं पदं कोष्ठरूपपूजास्थानम्। वास्तुमण्डलस्थमेककोष्ठात्मकस्थानम्। यथा, वास्तुयागतत्त्वधृतदेवीपुराणम्।
"इन्द्रस्येन्द्रात्मजस्योभावेकैकपदसंस्थितौ"॥)

एकपदः, पुं, (एकं पदं पदविन्यासो यस्मिन्।) शृङ्गारबन्धविशेषः। तस्य लक्षणम्।
पादमेकं हृदि स्थाप्य द्वितीयं स्कन्धसंस्थितम्।
स्तनौ धृत्वा रमेत् कामी बन्धस्त्वेकपदः स्मृतः"॥
इति रतिमञ्जरी॥ (वास्तुयागमण्डलैककोष्ठपूजनीयो देवभेदः। यथा वास्तुयागतत्त्वधृतदेवीपुराणवचनम्। "भृगुस्त्वेकपदो ज्ञेयः"। इति। एकं पदं चरणं यस्य इति विग्रहे वाच्यलिङ्गः। एकपदविशिष्टः। यथा भागवते १।१६।२०।
"पादैर्न्यूनं शोचसि मैकपाद-
मात्मानं वा वृषलैर्भोक्ष्यमाणम्"॥
एकेन पदा चरन् वृषरूपधरो धर्म्मो गोरूपधरां पृथ्वीं रुदतीं दृष्ट्वोवाच। हे भद्रे! पादैर्न्यूनं एकपादं मां तथा शूद्रैर्भोक्ष्यमाणमात्मानं वा शोचसि किम्। इति तट्टीका॥)

एकपदी, स्त्री, (एकः पादो यस्याम्। कुम्भपदीषु चेति निपातः। यद्वा संख्यासु पूर्व्वस्येति पादस्यान्तलोपः। पादोऽन्यतरस्यामिति ङीप्॥ स्वाङ्गाच्चेति ङीष् वा। पादः पत्।) पथ्याः। इत्यमरः॥

एकपर्णिका, स्त्री, (एकपर्णा+कन्। तपःसाधनार्थं पार्व्वत्याः पत्रमात्रभक्षणात् तथात्वम्।) दुर्गा। देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥
"अपर्णाशा निराहारा एकाशी एकपर्णिका।
पाटला पाटलाहारा देवी लोकेषु गीयते"॥

एकपात्, [द्] पुं, (एकः पादो यस्य। संख्यासु पूर्व्वस्येति अन्त्यलोपः।) शिवः। इति त्रिकाण्डशेषः॥ (रुद्रः। यथा, महाभारते सम्भवपर्व्वणि १।१२३।६५।